# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा–अक्टूबर, २०१९

| | | |
|---|---|---|
| कक्षा –शास्त्री–२ (SEM-३) | प्रश्नपत्रम् – ६<br>(C.C- 2.3.6 )<br>सन्दर्भग्रन्थः– चतुर्थपञ्चमलक्षणे | गुणाः – ७० |
| विषयः – नव्यन्यायः | | |
| दिनाङ्कः – १५/१०/२०१९ | | समयः– ८ तः ११ |

(विभागः-1)

प्र-1 द्वौ समाधेयौ। 10

1. 'वह्निमान् धूमात्' इत्यत्र चतुर्थलक्षणस्य समन्वयं कुरुत ।
2. तृतीयलक्षणे दोषमुद्भाव्य चतुर्थलक्षणावतरणे बीजमुपस्थाप्यताम् ।
3. व्यासज्यवृत्तिधर्माविच्छिन्नत्वेन साध्यवन्निष्ठप्रतियोगित्वस्य प्रयोजनं व्याख्यात ।

प्र-2 एकः समाधेयः। 10

1. साध्ये साकल्यपदस्य सार्थक्यं ब्रूत ।
2. धूमवान् वह्नेः – इत्यत्र अतिव्याप्तिमाशङ्क्य परिहरत ।

(विभागः-2)

प्र-3 द्वौ समाधेयौ। 10

1. कपिसंयोगी एतद्वृक्षत्वात् – इत्यत्र अव्याप्तिमुपस्थाप्यताम् ।
2. 'प्रतियोगिवैयधिकरण्यं च न प्रतियोग्यधिकरणावृत्तित्वं' व्याख्यात ।
3. मनः आत्मभिन्नं ज्ञानवदन्यत्वात् – इत्यत्र समन्वयं कुरुत ।

प्र-4 एकः समाधेयः। 10

1. "हेत्वभावोपि प्रतियोगितावच्छेदकतावच्छिन्नप्रतियोगिव्यधिकरणो बोध्यः" इति दीधितिवाक्यं व्याख्यात ।
2. "साध्याभावो वा साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको बोध्यः" व्याख्यात ।

(विभागः-3)

प्र-5 द्वौ समाधेयौ। 10

1. पञ्चमलक्षणे साध्यतावच्छेदकधर्मस्य प्रयोजनं प्रतिपादयत ।
2. सदनुमानलक्षणे पञ्चमलक्षणस्य समन्वयं कुरुत ।
3. अन्योन्याभावस्य साध्यवत्त्वावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबललभ्यं व्याख्यात ।

प्र-6 एकः समाधेयः। 10

1. पटः कम्बुग्रीवादिमदन्यः – इति वाक्यस्य प्रामाण्यमुपस्थाप्यताम् ।
2. परिष्कृतं पञ्चमं लक्षणं लिखत ।

प्र-7 दश समाधेयाः । 10

1. चतुर्थं लक्षणं किम् ?
2. नानाधिकरणसाध्यकसद्धेतुस्थलमेकं लिखत ।
3. सत्तावन्तः के ?
4. साकल्यं कुत्र निवेश्यते ?
5. जातेर्लक्षणं किम् ?
6. का नाम प्रतियोगी ?
7. 'धूमवान् वह्नेः' इत्यत्र कः दोषः ?
8. 'कपिसंयोगी एतद्वृक्षत्वात्' इत्यत्र कः दोषः ?
9. अभावद्वयेन कयोः अभावयोः ग्रहणम् ?
10. किं नाम प्रतियोगिव्यधिकरणम् ?
11. पञ्चमं लक्षणं लिखत ।
12. हेतुतावच्छेदकसम्बन्धः कः?
13. नवीनमते घटादन्यः इत्यादौ अनुयोगितायाः कः अर्थः ?
14. एकव्यक्तिविपक्षकस्थलं किम् ?
15. घटशब्दार्थः कः ?

## उत्तराणि

1. सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वम् ।
2. पर्वतो वह्निमान् धूमात् ।
3. द्रव्यगुणकर्माणि ।
4. साकल्यं साध्याभाववति साध्ये च बोध्यम् ।
5. नित्यमेकमनेकानुगतम् ।
6. यस्याभावः स प्रतियोगी ।
7. अतिव्याप्तिः ।
8. एतत्वृक्षत्ववान् कपिसंयोगात् – इत्यत्र अतिव्याप्तिः दोषः ।
9. साध्याभावस्य हेत्वभावस्य ।
10. प्रतियोगिनः यद् विरुद्धम् अधिकरणं प्रतियोगिव्यधिकरणम् ।
11. साध्यवदन्यावृत्तित्वम् ।
12. हेतुतावच्छेदकसम्बन्धः - येन सम्बन्धेन हेतुः स्वाधिकरणे वर्तते स सम्बन्धः ।
13. पञ्चम्यर्थः ।
14. एतद्घटभिन्नं पटत्वात् ।
15. कम्बुग्रीवादिमत्वम् ।